PART - V
SANSKRIT

51. साहित्यदर्पणकारस्य मतानुसारं कीदृशं वाक्यं काव्यमुच्यते ?

(1) यत्वाक्यं रसात्मकं भवति

(2) यत्वाक्यं अलंकारैः सुसज्जितं भवति

(3) यत्वाक्यं दोषरहितं भवति

(4) यस्य वाक्यस्य पदरचना सुदीर्घा भवति

52. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत।

	क		ख
(a)	वैनतेयः	(i)	ल्यप्
(b)	रूपवान्	(ii)	यत्
(c)	चेयम्	(iii)	ढक्
(d)	विहस्य	(iv)	मतुप्

(1) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(2) (a)-(iii), (b)-(iv), (c)-(ii), (d)-(i)

(3) (a)-(iii), (b)-(ii), (c)-(i), (d)-(iv)

(4) (a)-(ii), (b)-(i), (c)-(iv), (d)-(iii)

53. अधोलिखितयोः तालिकयोः समुचितं मेलनं कुरुत।

	क		ख
(a)	मूषिका	(i)	'षिद्गौरादिभ्यश्च'
(b)	पचन्ती	(ii)	'शार्ङ्गरवाऽऽद्यञो: ङीन्'
(c)	गौरी	(iii)	'अजाऽऽद्यतष्टाप्'
(d)	ब्राह्मणी	(iv)	'उगितश्च'

(1) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(2) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(3) (a)-(iii), (b)-(iv), (c)-(ii), (d)-(i)

(4) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

54. अधोलिखितयोः तालिकयोः सम्यक् सम्मेलनं कुरुत।

	क		ख
(a)	आयुर्घृतम्	(i)	गौणीसाध्यवसाना लक्षणा
(b)	गौरयम्	(ii)	लक्षणलक्षणा
(c)	कुन्ता प्रविशन्ति	(iii)	शुद्धासारोपालक्षणा
(d)	गंगायां घोषः	(iv)	उपादानलक्षणा

(1) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(2) (a)-(iii), (b)-(i), (c)-(iv), (d)-(ii)

(3) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(4) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

55. संस्कृतकाव्यशास्त्रे आचार्यैः काव्यप्रयोजनविषये गहन–विचारमन्थनं कृतम्। आचार्यमम्मटानुसारं अधोलिखितेषु किं काव्यप्रयोजनं न अस्ति?

(1) अमङ्गलनिवारणम्

(2) परमानन्दप्राप्तिः

(3) दुष्प्रवृत्तिसंवर्धनम्

(4) धनार्जनम्

56. साहित्यदर्पणे अनुप्रासालंकारस्य कति भेदाः प्रतिपादिताः?

(1) नव

(2) एकादश

(3) पञ्च

(4) सप्त

57. साहित्यदर्पणे 'अतिशयोक्तिः' इत्यलङ्कारस्य लक्षणं अस्ति –

"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते" उपर्युक्तलक्षणे 'अध्यवसायः' इत्यस्य पदस्य कोऽर्थः अस्ति?

(1) विषयिणः विषयनिगरेणाभेदप्रतिपत्तिः

(2) व्यापारोन्नतये वणिग्भिः निरन्तरेण कृतः परिश्रमः

(3) केनापि जनेन स्वजीवने कृतः अध्यवसायः

(4) स्वोद्देश्यस्य पूर्तिहेतोः क्रियमाणः परिश्रमः

58. मम्मटाचार्येण काव्यप्रकाशे ध्वनेः कति भेदाः प्रतिपादिताः?

(1) 404

(2) 1045

(3) 51

(4) 2601

59. नाट्यशास्त्रकारेण प्रतिपादितं यत् 'न हि रसादृते कश्चिदर्थः प्रवर्तते।' रसप्रक्रियायां कस्य स्थायिभावस्य गणना न क्रियते?

(1) विस्मयः

(2) शोकः

(3) जुगुप्सा

(4) मात्सर्यः

60. काव्यप्रकाशे अभिधाशक्तिप्रसंगे प्रतिपादितं यत् यदि केवलं व्यक्तौ सङ्केतग्रहः स्वीक्रियते तर्हि कतिपयाः दोषाः जायन्ते। एतेषु दोषेषु अधोलिखितेषु कस्य गणना न क्रियते?

(1) अस्पष्टता

(2) विषयविभागाप्राप्तिः

(3) आनन्त्यः

(4) व्यभिचारः

61. यस्मिन् अलंकारे सादृश्यात् अन्यवस्तूनि अन्यवस्तुनः निश्चयात्मकज्ञानं भवति, तच्च ज्ञानं कवेः प्रतिभोत्थितं भवेत्, अयं अलङ्कार कथ्यते :

(1) स्वाभावोक्तिः

(2) भ्रान्तिमान्

(3) विरोधाभासः

(4) उपमा

62. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत :

	क		ख
(a)	तमः	(i)	प्रकाशकं, इष्टम् च
(b)	सत्त्वम्	(ii)	उपष्टम्भकम्
(c)	गुणवृत्तिः	(iii)	गुरु–वरणकम्
(d)	रजः	(iv)	प्रदीपवत्

(1) (a)-(iii), (b)-(ii), (c)-(iv), (d)-(i)

(2) (a)-(i), (b)-(iv), (c)-(ii), (d)-(iii)

(3) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

(4) (a)-(iii), (b)-(i), (c)-(iv), (d)-(ii)

63. साहित्यदर्पणे सन्देहालङ्कारस्य त्रयः भेदाः निगदिताः। इमे भेदाः सन्ति – शुद्धः, निश्चयगर्भः, निश्चयान्तश्च। एषु भेदेषु शुद्धस्य किं लक्षणम् :

(1) यत्र पद्यस्य आदौ संशयः भवति

(2) यत्र पद्यस्य आदौ संशयः, अन्ते च निश्चयः भवति

(3) यस्मिन् उदाहरणे संशयस्य कोऽपि संभावना न भवति

(4) अस्मिन् भेदे वर्णनस्य समाप्तिः संशय एव भवति

64. सांख्यकारिकायां त्रीणि प्रमाणानि प्रतिपादितानि। एतेषु प्रमाणेषु कस्य गणना न क्रियते ?

(1) अनुमानम्

(2) आप्तवचनम्

(3) प्रत्यक्षः

(4) उपमानम्

65. सांख्यदर्शनेन दुःखत्रयः स्वीकृतः। एतेषु दुःखेषु आध्यात्मिकं दुःखं कीदृशं वर्तते ?

(1) शारीरिक, मानसिकं च दुःखम्

(2) आत्माविषयकं दुःखम्

(3) दैवसम्बन्धि दुःखम्

(4) प्राणिसमूहेन प्राप्तं दुःखम्

2234083

66. तर्कभाषायां शब्दप्रमाणस्य लक्षणं प्रतिपादितं – 'आप्तवाक्यं शब्दः'। अत्र आप्तपदस्य कः अभिप्रायः अस्ति ?

(1) जीवनयात्रा सञ्चालनाय प्राप्तं ज्ञानम्

(2) येन वाक्येन यथार्थज्ञानस्य प्राप्तिर्भवति

(3) यथाभूतार्थस्योपदेष्टा पुरुषः

(4) यत्ज्ञानं सर्वैः जनैः प्राप्यं भवति

67. इन्द्रियार्थयोस्तु यः सन्निकर्षः साक्षात्कारिप्रमाहेतुः सः षड्विधः कथितः। ऐषु हेतुषु कः न गण्यते ?

(1) संयोगः

(2) विशेष्यविशेषणभावः

(3) समवेतसमवायः

(4) सुखदुःखसमभावः

68. अधोलिखितयोः तालिकयोः समुचितं मेलनं कुरुत :

क		ख	
(a)	काम्यानि	(i)	अकरणे प्रत्यवायसाधनानि
(b)	निषिद्धानि	(ii)	पुत्रजन्माद्यनुबन्धीनि
(c)	नित्यानि	(iii)	नरकाद्यनिष्टसाधनानि
(d)	नैमित्तिकानि	(iv)	स्वर्गादीष्टसाधनानि

(1) (a)-(ii), (b)-(i), (c)-(iv), (d)-(iii)

(2) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(3) (a)-(iv), (b)-(iii), (c)-(i), (d)-(ii)

(4) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

69. भगवद्गीतानुसारं योगिनः अन्तःकरणेन केवलैरिन्द्रियैरपि च कस्मै कर्म कुर्वन्ति ?

(1) आत्मशुद्धये

(2) परैः प्रशंसाप्राप्तुम्

(3) स्वर्गप्राप्तये

(4) सांसारिकसुखेभ्यः

70. वेदान्तसारे श्रद्धा – इत्यनेन पदेन किं ज्ञायते ?

(1) विशिष्टोत्सवेषु उपवासादेः पालनम्

(2) गुरूपदिष्टवेदान्तवाक्येषु विश्वासः

(3) ईश्वरस्य अस्तित्वे विश्वासः

(4) नियमितरूपेण मन्दिरं गत्वा अर्चनादि

71. 'कामेन क्रोधोऽभिजायते' – अस्मिन् वाक्ये रेखाङ्कित पदे सम्यक् विभक्तिं प्रयोजय।

(1) कामस्य

(2) कामम्

(3) कामाय

(4) कामात्

72. 'न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः' अस्यां सूक्त्यां कस्य वर्णनं कृतम्?

(1) मृषा

(2) वाणी

(3) इच्छा

(4) हितैषी

73. अधोलिखितं वाक्यं बहुवचने परिवर्तयत - उद्याने खगः कूजति :

(1) उद्यानेषु खगाः कूजन्ति

(2) उद्याने खगाः कूजति

(3) उद्याने खगः कूजन्ति

(4) उद्यानेषु खगः कूजन्ति

74. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत :

	क		ख
(a)	भवितव्यानां द्वाराणि भवन्ति सर्वत्र	(i)	नीतिशतकम्
(b)	वरं विरोधोऽपि समं महात्मभिः	(ii)	मुद्राराक्षसम्
(c)	विवेकभ्रष्टानां भवति विनिपातः शतमुखः	(iii)	अभिज्ञानशाकुन्तलम्
(d)	सर्वः सर्वं न जानाति	(iv)	किरातार्जुनीयम्

(1) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(2) (a)-(iv), (b)-(ii), (c)-(iii), (d)-(i)

(3) (a)-(iii), (b)-(i), (c)-(iv), (d)-(ii)

(4) (a)-(ii), (b)-(iv), (c)-(i), (d)-(iii)

75. श्रीकृष्णेन कथितं यदा मनुष्यः __________ प्रजहाति तदा सः स्थितप्रज्ञः उच्यते। उचितं वाक्यं चित्वा रिक्तस्थानं पूरयत।

(1) सर्वासु कलासु निपुणः भवति

(2) सर्वविधं अज्ञानम्

(3) सर्वेषु शास्त्रेषु पारंगतः भवति

(4) सर्वान् मनोगतान् कामान्

76. 'यस्य नास्ति स्वयं प्रज्ञा शास्त्रः तस्य किं करोति' - सूक्तिः कस्मिन् ग्रन्थे उद्धृता?

(1) चाणक्यनीतिः

(2) मनुस्मृतिः

(3) हितोपदेशः

(4) नीतिशतकम्

77. भगवद्गीतानुसारं कीदृशाः जनाः कृष्णं न भजन्ते?

(1) स्वार्थिनः

(2) सुकृतिनः

(3) आर्ताः

(4) जिज्ञासायुक्ताः

78. नाटकस्य आरंभपूर्वं, यस्मिन् नटी, विदूषकः, परिपार्श्वक वा सूत्रधारेण सह वार्तालापं कुर्वन्ति, तत् कथ्यते :

(1) परिचर्चा

(2) उपस्थापनम्

(3) प्रस्तावना

(4) परिचयः

79. नाट्ये 'जनान्तिकम्' इत्यस्य प्रयोगः किमर्थ क्रियते ?

(1) अत्र केवलं प्रमुखाः अभिनेतारः वार्तालापं कुर्वन्ति

(2) अस्मिन् सूत्रधारादयः वार्तालापं कुर्वन्ति

(3) एतत् विशिष्टजनान् श्रावयितुं एव भवति

(4) अस्मिन् सर्व एव जनाः संवादान् शृण्वन्ति

0.25

80. यस्मिन् एकः प्रथमश्रेण्याः पात्रः द्वितीयश्च निम्नश्रेण्याः भवति, यस्मिन् च संस्कृतप्राकृतयोः द्वयोः अपि भाषयोः प्रयोगः क्रियते, एतत् कथ्यते :

(1) संकीर्णविष्कम्भकः

(2) प्रस्तावना

(3) प्रवेशकः

(4) शुद्धविष्कम्भकः

81. कथावस्तुनः कति भेदाः सन्ति ?

(1) नव

(2) त्रयः

(3) द्वौ

(4) सप्त

82. 'श्रीकृष्णः पार्थेन जयद्रथं घातयति' - एतत् वाक्यं कर्मवाच्ये परिवर्तयत :

(1) श्रीकृष्णेन पार्थः जयद्रथः घात्यते

(2) श्रीकृष्णेन पार्थः जयद्रथेन घातयति

(3) श्रीकृष्णः पार्थेन जयद्रथं घात्यते

(4) श्रीकृष्णेन पार्थेन जयद्रथः घात्यते

83. अष्टमकक्षायाः एका अध्यापिका छात्रान् एकं पुस्तकं पठितुं निर्दिशति। तदनन्तरं सा छात्रान् समूहेषु विभज्य तस्याः कथायाः मुख्य बिंदु-आधारितं एकं अनुच्छेदं लिखितुं कथयति। एवं विधं कार्यं कथ्यते -

(1) व्याकरणाभ्यासः

(2) टिप्पणीसङ्कलनम्

(3) कार्यस्य पुनर्लेखनम्

(4) श्रुतलेखः

84. मानवेषु प्रथमभाषाविकासः साधारणतया ज्ञायते –

(1) परिवर्धनम् (Development)

(2) संज्ञानम् (Cognition)

(3) अधिगमः (Learning)

(4) अधिग्रहणम् (Acquisition)

85. 'NEP-2020' इत्यस्यां 'कॅरियर मैनेजमेंट एण्ड प्रोग्रैशन (CMP)' इत्यस्य प्रावधानं कस्यार्थं कृतम्।

(1) विद्यालयेषु छात्राणां सांस्कृतिककार्यक्रमाणां प्रबन्धनार्थम्

(2) शिक्षकानां पदोन्नति – वेतनवृद्धिमाध्यमेन प्रोत्साहनार्थम्

(3) छात्रेभ्यः व्यवसायव्यवस्थार्थम्

(4) शिक्षकानां शिक्षणकौशलस्य संवर्धनार्थम्

86. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत –

	(क)		(ख)
(a)	आई टी आई (ITI)	(i)	मानव संसाधन विकास मंत्रालय
(b)	बी ई ओ (BEO)	(ii)	शिक्षक पात्रता परीक्षा
(c)	एम एच आर डी (MHRD)	(iii)	औद्योगिक प्रशिक्षण संस्थान
(d)	टी ई टी (TET)	(iv)	ब्लॉक शिक्षा अधिकारी

(1) (a)-(ii), (b)-(i), (c)-(iv), (d)-(iii)

(2) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

(3) (a)-(iii), (b)-(iv), (c)-(ii), (d)-(i)

(4) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

87. एकस्मिन् वस्तुस्थितेः शब्दैः चित्रणं क्रियते, यथा – किम् अभवत्, कदा अभवत्, कुत्र अभवत्, कार्यकलापस्य उद्दीपनं किम् आसीत्, कार्यस्य अन्तः कथम् अभवत् इत्यादिः, एतत् कथ्यते –

(1) आबण्टनम् (Assignment)

(2) परिमापनदण्डः (Rating Scale)

(3) परियोजनाकार्यम् (Project Work)

(4) उपाख्यानात्मकम् अभिलेखनम् (Anecdotal Record)

88. एका शिक्षिका छात्रान् पाठयितुं गृहात् विविधवस्तूनि, यथा– स्थाली, चमसः, भाण्डानि, क्रीडनकानि, यात्रापत्रकानि, पुस्तकानि इत्यादीन् आनयति। अनेन छात्राः शब्दावल्याः शब्दानां, वास्तविक–व्यवहारस्य च मध्ये सम्बन्धं स्थापयित्वा सरलतया अध्ययनं कुर्वन्ति। एतत् शिक्षणविधिः कथ्यते –

(1) प्रदर्श्य–सामग्री

(2) पुस्तकालयीय–सामग्री

(3) मनोरञ्जक–सामग्री

(4) प्रामाणिक–सामग्री

89. एकस्याः प्रभावकारिभाषाकक्षायाः सर्वाधिकं महत्त्वपूर्णं लक्ष्यं, विद्यार्थिनां कृते कस्य अवसरप्रदानम् अस्ति ?

(1) वार्ताविनिमयः

(2) दोषानां न्यूनीकरणम्

(3) मूल्याङ्कनम्

(4) अनुकरणम्

90. 'NEP-2020' – इत्यनुसारं छात्राणां गुणवत्तापूर्णाधिगमार्थं उपयुक्तसंसाधनेषु किं आवश्यकं न वर्तते ?

(1) आपणम्

(2) छात्रेभ्यः संवादस्थानम्

(3) प्रयोगशालाः

(4) प्रौद्योगिकी

91. 'NEP-2020' – इत्यस्मिन् केन्द्रीयविचारणीयविषयेषु व्यावसायिकशिक्षायाः अत्यन्तं महत्त्वं वर्तते। अस्यां का शिक्षा न समाविष्टा ?

(1) कृषि–शिक्षा

(2) चौरकर्म–शिक्षा

(3) स्वास्थ्य–शिक्षा

(4) विधिक–शिक्षा

92. 'NEP-2020' – इत्यनुसारं पर्यावरणशिक्षायाः समाविष्टविषयेषु अधोलिखितेषु किं न वर्तते ?

(1) वन्यजीवसंरक्षणम्

(2) प्रदूषणम्

(3) सामुदायिक–कार्यक्रमाः

(4) अपशिष्टप्रबन्धनम्

93. 'नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम्' – इत्यस्याः सूक्त्याः भावार्थः किं स्यात् ?

(1) सर्वे जन्तवः सर्वेषु पदार्थेषु स्वप्राणान् एव महत्त्वं प्रददति

(2) सर्वे मनुष्याः परस्य प्राणान् किञ्चिदपि न मन्यन्ते

(3) सर्वे प्राणिनः अस्मिन् लोके भोजनार्थं जीवन्ति

(4) अस्मिन् संसारे ईश्वरेण सर्वेभ्यः प्राणाः प्रदत्ताः

94. 'मृच्छकटिकम्' रूपकस्य कः भेदः अस्ति ?

(1) समवकारः

(2) डिमः

(3) प्रहसनम्

(4) प्रकरणम्

95. 'नलचम्पूः' – इत्यस्मिन् ग्रन्थे श्रुतिशीलः कस्य पुत्रः अस्ति ?

(1) नलस्य

(2) भीमस्य

(3) वीरसेनस्य

(4) सालङ्कायनस्य

96. 'गुञ्जति वनान्तरमपरमुच्चलिते चञ्चलचञ्चरीकचक्रवाले' – अस्मिन् वाक्ये चञ्चरीकशब्दस्य कोऽर्थः ?

(1) भ्रमरम्

(2) चञ्चलः

(3) चञ्चूः

(4) चटका

97. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत :

	क		ख
(a)	वैराग्यशतकम्	(i)	मयूरभट्टः
(b)	मेघदूतम्	(ii)	बिल्हणः
(c)	सूर्यशतकम्	(iii)	भर्तृहरिः
(d)	चौरपञ्चाशिका	(iv)	कालिदास

(1) (a)-(i), (b)-(ii), (c)-(iv), (d)-(iii)

(2) (a)-(iii), (b)-(iv), (c)-(ii), (d)-(i)

(3) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(4) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

98. आभीरवंशस्य राज्ञः शिवदत्तस्य एव अपरो नाम शूद्रक अस्ति–कथनमेतत् केन विदुषा गदितम् ?

(1) पिशेलमहोदयेन

(2) चन्द्रशेखरेण

(3) डॉ. स्मिथमहोदयेन

(4) प्रो. कोनोमहोदयेन

99. 'अभिन्यवीविशत्' – अस्य पदस्य व्याकरणात्मकः परिचयः देयः।

(1) अभि+नि+√विश्, +शतृ प्रत्ययः

(2) अभि+नि+√विश्, +णिच्+लुङ्, प्र.पु. एकवचनम्

(3) अभिनी+अवीविशत् (यण्-सन्धिः)

(4) अभि+नि+√विश्, लोट् लकारः, प्रथम पुरुषः, एकवचनम्

100. शूद्रकरचितस्य मृच्छकटिकस्य तृतीयाङ्कस्य नाम किमस्ति?

(1) मदनिका-शर्विलकः

(2) सन्धि-विच्छेदः

(3) अलंकारन्यासः

(4) द्यूतकर-संवाहकः

101. अभिज्ञानशाकुन्तले राजा दुष्यन्तः धीरोदात्तः नायकः अस्ति। दशरूपकानुसारं धीरोदात्तनायके कः गुणः न विद्यते?

(1) गम्भीरता

(2) स्थैर्यम्

(3) क्षमाशीलता

(4) मात्सर्यम्

102. संस्कृतगीतिकाव्येषु प्रमुखरूपेण कस्य विषयस्य वर्णनं न क्रियते?

(1) ऋतुवर्णनम्

(2) देवस्तुतिः

(3) विरहः

(4) तन्त्र-विद्या

103. गाथासप्तशती ग्रन्थः कस्यां भाषायां लिखितः?

(1) प्राकृतम्

(2) मागधी

(3) संस्कृतम्

(4) शौरसेनी

104. 'इष्टप्रवासजनितान्यबलाजनस्य दुःखानि नूनमतिमात्र-सुदुःसहानि'– अस्याः सूक्त्याः भावार्थं चिनोतु।

(1) स्त्रियः स्वप्रियस्य वियोगेन उत्पन्नं दुःखं कठिनतया सहन्ते

(2) विदेशगमनं जनेभ्यः दुष्करं कार्यं वर्तते

(3) अबलाजनैः अपरिचिते स्थाने दुःखेन प्रवासःक्रियते

(4) जनाः इष्टनिवासान् अतीवकष्टेन त्यजन्ति

105. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत :

	क		ख
(a)	भट्टनारायणः	(i)	स्वर्गारोहणम्
(b)	कुमारदासः	(ii)	रावणवधः
(c)	वररुचिः	(iii)	जानकीहरणम्
(d)	भट्टिः	(iv)	वेणीसंहारः

(1) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(2) (a)-(iv), (b)-(iii), (c)-(i), (d)-(ii)

(3) (a)-(iv), (b)-(i), (c)-(ii), (d)-(iii)

(4) (a)-(iii), (b)-(ii), (c)-(i), (d)-(iv)

106. 'वाक्यपदीयम्'– ग्रन्थोऽयं कस्य कवेः कृतिरस्ति ?

(1) कात्यायनः

(2) नागेशभट्टः

(3) भर्तृहरिः

(4) भट्टोजीदीक्षितः

107. 'बाण _________ जगत्सर्वम्' अधोलिखितेषु उचितत

पदं चित्वा रिक्तस्थानं पूरयत।

(1) उच्छिष्टम्

(2) विनष्टम्

(3) रचितम्

(4) अवलोकितम्

108. समासप्रयोगस्य वृत्तभागनिवेशस्य च दृष्ट्या गद्यस्य क

भेदाः सन्ति ?

(1) त्रयः

(2) पञ्च

(3) चत्वारः

(4) अष्टौ

109. 'प्रकरणम्' रूपकस्य एकः भेदः अस्ति। प्रकरणस्य वृ

कीदृशं भवति ?

(1) देवकथाधारितम्

(2) कविकल्पितम्

(3) प्रख्यातम्

(4) लोककथाधारितम्

110. गद्यकाव्यस्य प्राचीनतमं रूपं कुत्र प्राप्यते ?

(1) आरण्यकग्रन्थेषु

(2) ब्राह्मणग्रन्थेषु

(3) उपनिषत्सु

(4) कृष्णयजुर्वेदे

111. अधोलिखितेषु कः कविः आलोचकैः ''दीपशिखा'' इति उपाधिना विभूषितः ?

(1) कालिदासः

(2) कल्हणः

(3) माघः

(4) कुमारदासः

112. नाट्योत्पत्तिविषये पुत्तलिकानृत्यसिद्धान्तस्य प्रवर्तकः कः आसीत् ?

(1) डॉ. पिशेलः

(2) डॉ. रिजवे

(3) प्रो. कोनो

(4) प्रो. ल्यूडर्स

113. मैक्समूलर > मोक्षमूलर, गोडाउन > गोदाम - अत्र ध्वनिपरिवर्तनस्य किं कारणं मन्यते ?

(1) कृत्रिमता

(2) भ्रामक-व्युत्पत्तिः

(3) शीघ्रभाषणम्

(4) अशिक्षा

114. भाषायाः उत्पत्तिविषये अधोलिखितेषु कः सिद्धान्तः प्रचलितः नास्ति ?

(1) आत्मसन्तुष्टि - सिद्धान्तः

(2) प्रतिभा - सिद्धान्तः

(3) सङ्केत - सिद्धान्तः

(4) ध्वन्यनुकरण - सिद्धान्तः

115. लौकिकसंस्कृतभाषा कस्याः भाषायाः परिवर्तितं रूपं अस्ति ?

(1) पालिभाषा

(2) अर्धमागधी

(3) वैदिकसंस्कृतम्

(4) हिन्दीभाषा

116. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत।

	क		ख
(a)	हर्षवर्धनः	(i)	आश्चर्यचूडामणि
(b)	मुरारिः	(ii)	त्रिपुरदाह
(c)	शक्तिभद्रः	(iii)	प्रियदर्शिका
(d)	वत्सराजः	(iv)	अनर्घराघव

(1) (a)-(iii), (b)-(ii), (c)-(iv), (d)-(i)

(2) (a)-(i), (b)-(ii), (c)-(iii), (d)-(iv)

(3) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(4) (a)-(ii), (b)-(i), (c)-(iv), (d)-(iii)

117. अर्थपरिवर्तनस्य दिक्षु भाषाविज्ञानानुसारं अधोलिखितेषु किं कारणं न गण्यते ?

(1) अर्थविस्तारः

(2) अर्थसंकोचः

(3) अर्थोत्कर्षः

(4) अर्थविस्मरणम्

118. √भू धातोः लुट् लकारे उत्तमपुरुषे रूपाणि भवन्ति –

(1) भवितास्मि भवितास्वः भवितास्मः

(2) अभूवम् अभूव अभूम

(3) भवेयम् भवेव भवेम

(4) अभवम् अभवाव अभवाम

119. 'नलोपो नञः' अस्य सूत्रस्य अधोलिखितेषु किं उदाहरणम् अस्ति ?

(1) अब्राह्मणः

(2) अपवादः

(3) अनश्च

(4) अविवादः

120. 'पिता मात्रा' इत्यस्य सूत्रस्य कोऽर्थः ?

(1) मातृ पितृ च सुबन्तयोः पितृशब्दस्य वैकल्पिकः एकशेषः भवति

(2) पिता मात्रा सह विपणं गच्छति

(3) पिता माता च मिलित्वा गृहकार्यं कुर्वतः

(4) पिता कार्यालयं गच्छति माता च भोजनं पचति

121. चुरादिभ्यः धातुभ्यः णिच् प्रत्ययः भवति। णिच् प्रत्ययस्य णकारस्य इत्संज्ञायाः किं प्रयोजनं भवति ?

(1) णिच् प्रत्ययस्य प्रयोगः चुरादिधातून् विहाय कुत्रापि न क्रियते

(2) णिच् प्रत्ययः गुणस्य कारणं भवति

(3) प्रत्ययोऽयं 'णित्' अस्ति, इति कारणात् इकारस्य वृद्धेः निमित्तं भवति

(4) चुरादिधातूनां रूपसिद्धिप्रक्रियायां णिच् प्रत्ययः निरर्थकः भवति

122. रुरोध, रुरुधतुः, रुरुधुः – एतानि √रु ध् धातोः कस्य लकारस्य रूपाणि सन्ति ?

(1) लोट् लकारः, उत्तमपुरुषः

(2) लुङ् लकारः, उत्तमपुरुषः

(3) आशीर्लिङ्ः, मध्यमपुरुषः

(4) लिट् लकारः, प्रथमपुरुषः

123. दिवादिभ्यः धातुभ्यः कस्य विकरणस्य प्रयोगः क्रियते ?

(1) शप्

(2) श्यन्

(3) लुक्

(4) श्लु

124. 'येनाङ्गविकारः' इत्यस्य सूत्रस्य उदाहरणं अधोलिखितेषु किं नास्ति ?

(1) पादेन खञ्जः

(2) कर्णेन बधिरः

(3) अक्षिकाणमस्य

(4) अक्ष्णा काणः

125. 'गर्गान् शतं दण्डयति' वाक्यमेतत् कस्य सूत्रस्य उदाहरणम् अस्ति ?

(1) 'उपोऽधिके च'

(2) 'अकथितं च'

(3) 'कर्मणि द्वितीया'

(4) 'अभिनिविशश्च'

126. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत।

	क		ख
(a)	'अचो यत्'	(i)	एधनीयम्
(b)	'युवोरनाकौ'	(ii)	जगन्वान्
(c)	'म्वोश्च'	(iii)	चेयम्
(d)	तव्यत्-तव्यानीयरः	(iv)	कारकः

(1) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

(2) (a)-(ii), (b)-(i), (c)-(iv), (d)-(iii)

(3) (a)-(iii), (b)-(iv), (c)-(ii), (d)-(i)

(4) (a)-(ii), (b)-(iii), (c)-(i), (d)-(iv)

127. अधोलिखितयोः तालिकयोः सम्यक् मेलनं कुरुत।

	क		ख
(a)	'अधिशीङ्स्थासां'	(i)	चतुर्थी विभक्तिः
(b)	'सु पूजायाम्'	(ii)	पञ्चमी विभक्तिः
(c)	'रुच्यर्थानां प्रीयमाणः'	(iii)	द्वितीया विभक्तिः
(d)	'अन्तर्धौ येनादर्शन - मिच्छति'	(iv)	कर्मप्रवचनीयः

(1) (a)-(iii), (b)-(iv), (c)-(ii), (d)-(i)

(2) (a)-(i), (b)-(iii), (c)-(iv), (d)-(ii)

(3) (a)-(iv), (b)-(iii), (c)-(ii), (d)-(i)

(4) (a)-(iii), (b)-(iv), (c)-(i), (d)-(ii)

128. 'पठित्वा क्रीडति' अस्मिन् पदे √पठ् धातोः क्त्वा प्रत्ययस प्रयोगः केन सूत्रेण कृतः ?

(1) 'घञि च भाव-करणयोः'

(2) 'जहातेश्च क्त्वि'

(3) 'न क्त्वा सेट्'

(4) 'समान-कतृकयोः पूर्वकाले'

129. 'शीर्णः' अस्मिन् पदे कस्य प्रत्ययस्य प्रयोगेण रूपसिद्धि निष्पादिता ?

(1) क्तवतु

(2) क्त

(3) अण्

(4) तृच्

130. 'कृष्णं द्रष्टुं याति' अस्मिन् वाक्ये कस्य सूत्रस्य प्रयोगः कृतः ?

(1) 'तुमुन् - ण्वुलौ क्रियायां क्रियाऽर्थायाम्'

(2) 'करणे यजः'

(3) 'क्त्रेर्मम् नित्यम्'

(4) 'आभीक्ष्ण्ये णमुल् च'